## Text: Mitrasamprapti in Panchatantra of Vishnu Sharman

विष्णुशर्मविरचिते पञ्चतन्त्रे 'मित्रसम्प्राप्तिः' – प्रश्नानां कोशः

### १. समीचीनम् उत्तरं चिनुत – 1X10=10

१. पञ्चतन्त्रस्य रचयिता कः? विष्णुशर्मा ।
२. कस्य राज्ञः पुत्राः मूर्खाः आसन्? अमरकीर्तेः
३. दाक्षिणात्ये किं नाम नगरम् अस्ति? महिलारोप्यं ।
४. लघुपतनक इति कस्य नाम? वायसस्य
५. यमकिङ्करकारः कः? लुब्धकः ।
६. वृक्षस्य अधः लुब्धकः कान् प्रसारितवान्? तण्डुलान्
७. चित्रग्रीवः इति कस्य नाम? कपोतराजस्य ।
८. रविनिशाकरयोः किं भवति? ग्रहपीडनम्
९. मूषकराजः कस्य पाशमोचनं कृतवान्? कपोतस्य ।
१०. सुतप्तं पानीयं पावकं किं करोति? शमयति
११. महिलारोप्यस्य नातिदूरे कः पादपः अस्ति? न्यग्रोधः।
१२. कपोतस्य पाशमोचनं कः कृतवान्? मूषकराजः
१३. कयोः ग्रहपीडनं भवति? शशिनिशाकरयोः ।
१४. तण्डुलान् कः प्रसारितवान् ? लुब्धकः
१५. लुब्धकः कः इव आसीत्? यमकिङ्करः इव ।
१६. नारायणपण्डितस्य कृतिः का? हितोपदेशः
१७. हितोपदेशस्य कर्ता कः? नारायणपण्डितः ।
१८. कपोतराजस्य नाम किम्? चित्रग्रीवः
१९. वृक्षस्य अधः कः तण्डुलान् प्रसारितवान्? लुब्धकः ।
२०. अमरकीर्तिमहाराजस्य पुत्राः कथम् आसन्? मूर्खाः
२१. मन्थरकः कः? कूर्मः ।
२२. सोमदेवस्य कृतिः का? कथासरित्सागरः ।
२३. महासरः कुत्र अस्ति? वनगहनमध्ये ।
२४. मत्स्यमांसखण्डानि कः दास्यति? कूर्मः ।
२५. आकाशगतिः कः? वायसः
२६. कूर्मस्य नाम किम्? मन्थरकः
२७. बृहत्कथायाः रचयिता कः? गुणाढ्यः ।
२८. कथासरित्सागरस्य कर्ता कः? सोमदेवः
२९. जालमादाय के गच्छन्ति? कपोताः ।
३०. यत्नेन विनापि किं भवति? भाव्यम् ।
३१. मूषकराजस्य नाम किम्? हिरण्यकः ।
३२. कः अर्थान् साधयति? मित्रवान् ।
३३. कः चन्द्रोदयमपेक्षते? नदीशः ।
३४. वैरं कतिविधम्? द्विविधम् ।
३५. कीदृशं वैरं कारणेन निवृत्तं भवति? कृत्रिमम् ।
३६. कस्य मैत्री आरम्भगुर्वी भवति? खलस्य ।
३७. नकुलसर्पाणां वैरं कीदृशम्? सहजम्
३८. सत्पदं किम्? मैत्रम् ।
३९. प्रीतिलक्षणं कतिविधम्? षड्विधम्
४०. मन्थरकः कुत्र वसति? महासरसि ।
४१. स्वदेशे कः पूज्यते? राजा ।
४२. सर्वत्र कः पूज्यते? विद्वान् ।
४३. उड्डीन गतिविशेषाः कति? अष्ट ।
४४. हिरण्यकः कस्य उपरि समारूढः? वायसस्य ।
४५. ताम्रचूडकथां कः वदति? हिरण्यकः ।
४६. महादेवस्य मठायतने कः प्रतिवसति? ताम्रचूडः।
४७. ताम्रचूडः भिक्षापात्रं केन ताडयति? जर्जरवंशेन ।
४८. मत्कोपार्जनं केन भवति? मदाश्रयेण ।
४९. मूषकः केन कूर्दते? निधानोष्मणा ।
५०. का अनन्तफलदा भवति? दक्षिणायनसङ्क्रान्तिः ।
५१. पुलिन्देन कः समासादितः? क्रोडः ।
५२. पुलिन्दः केन पाटितोदरः अभवत्? दंष्ट्रेण ।
५३. वराहपुलिन्दौ कः पश्यति? शृगालः ।
५४. का न कर्तव्या? अतितृष्णा ।
५५. देहिना किं भुज्यते? शुभाशुभकर्म ।
५६. ब्राह्मणी केन भोजयितुमिच्छति? तिलचूर्णेन ।
५७. कीदृशाः तिलाः अग्राह्याः? लुञ्चिताः ।
५८. कृपालः कः पतितः? मृगः ।
५९. सर्वः केन बलवान् भवति? अर्थेन ।
६०. कीदृशस्य पुरुषस्य जीवनं धिक्? अर्थहीनस्य ।
६१. प्राज्यमर्थं कः लभते? मनुष्यः ।
६२. बृहत्कथामञ्जर्याः कर्ता कः? क्षेमेन्द्रः ।

### २. प्रबन्धरूपेण उत्तरं लिखत – 10X2=20

१ नीतिकथासाहित्यस्य उद्भवविकासौ वैशिष्ट्यं च अधिकृत्य प्रबन्धं लिखत।
२ विष्णुशर्मणः देशकालकृतीः अधिकृत्य प्रबन्धं लिखत ।
३ पञ्चतन्त्रग्रन्थस्य वैशिष्ट्यं लिखत ।
४ चित्रग्रीवकथां विस्तारेण वर्णयत ।
५ लघुपतनकहिरण्यकयोः संवादं विशदयत ।
६ प्रसिद्धकथासाहित्यग्रन्थानधिकृत्य प्रबन्धं लिखत ।
७ चित्रग्रीवहिरण्यकयोः संवादं विशदयत ।
८ हिरण्यकस्य वैराग्यकारणं विरूपयत ।
९ हिरण्यकताम्रचूडयोः कथां विस्तारेण लिखत ।
१०. ब्राह्मणब्राह्मणीसंवादं विस्तारेण लिखत ।
११. अतितृष्णा न कर्तव्या इत्युक्तिं शबरसूकरकथाद्वारा वर्णयत ।
१२. तिलचूर्णकथां विस्तारेण लिखत ।

३. एकस्य गद्यभागस्य अनुवादं कुरुत **12X1=12**

| | |
|---|---|
| १. तत्र च लघुपतनको नाम वायसः ---------तस्य न विश्वसनीयम् । | page - 1 |
| २. अथ ये पक्षिणस्तत्र --------अहो ! न भेतव्यम् । | page - 2 |
| ३. तदास्तां तावत् विहङ्गामिषलोभो --------सुखेन आस्ते । **(श्लोकं विहाय)** | page - 3 |
| ४. अथ चित्रग्रीवो बिलमासाद्य -------- त्वरमाणो निष्क्रान्तः । | page - 3-4 |
| ५. एवं सम्प्रधार्य -------न क्रियते मया सह दर्शनम् । | page – 6-7 |
| ६. वायस आह – भोः! द्विविधस्य --------सन्तापयन्ति । | page -8 |
| ७. एवं स मूषकः ----------एतद्विरक्तेः कारणम् । | page -10 |
| ८. हिरण्यक आह – यदि एवं ---------तत्र कालं नयामि । | page - 11 |
| ९. तच्छ्रुत्वा हिरण्यकः --------आलिङ्ग्य माम् । | page - 12 |
| १०. एवं द्वौ अपि विहितालिङ्गनौ -------द्वितीयमिव जीवितम् । | page - 13 |
| ११. अस्ति दाक्षिणात्ये जनपदे -------पुनरगम्यं किमपि नास्ति । | page - 14 |
| १२. तदाकर्ण्य अहं सकलयूथपरिवृतः ------ अपसर्पामि । | page – 14-15 |
| १३. अस्ति कस्मिंश्चित् वनोद्देशे --------- तं प्रदेशमाजगाम । | page – 18-19 |
| १४. अथ ज्ञायते तस्य क्रमणमार्गः -------- चिन्तितम् । | page – 20-21 |
| १५. अथ अहमेकोऽन्यत्र गतः -------- --- न शक्नोमि । | page – 21-22 |

४. **वाक्यद्वयं ससन्दर्भं विवृणुत** **4X2=8**

१. दुरात्मा लुब्धको जालतण्डुलहस्तः समभ्येति ।
२. सर्वथा तस्य न विश्वसनीयम् ।
३. सर्वैरपि कालकूटसदृशाः द्रष्टव्याः ।
४. भोः ! निवृत्तः स दुरात्मा लुब्धकः ।
५. साम्प्रतं त्वम् सत्वरम् पाशविमोचनम् कुरु ।
६. विधिरहो बलवानिति मे मतिः ।
७. भोः ! न युक्तमुक्तं भवता ।
८. मित्र ! गम्यतामधुना स्वाश्रयं प्रति ।
९. त्वम् भोक्ता । अहं ते भोज्यभूतः ।
१०. भोः त्वया वैरिणा सह कथं मैत्रीं करोमि ।
११. द्विविधं वैरं भवति । सहजं कृत्रिमं च ।
१२. छायेव मैत्री खलसज्जनानाम् ।
१३. न मे अस्ति ते शपथैः प्रत्ययः ।
१४. षड्विधं प्रीतिलक्षणम् ।
१५. विरक्तिः सञ्जाता मे साम्प्रतम् ।
१६. स्वदेशे पूज्यते राजा विद्वान् सरत्र पूज्यते ।
१७. मम सुहृत् द्वितीयमिव जीवितम् ।
१८. त्वदीयं मठम् त्यक्त्वा अन्यत्र मठे यास्यामि ।
१९. मठे मार्जनक्रिया अपि न भवति ।
२०. कुतस्ते दारिद्र्योपहतस्य भोजनप्राप्तिः ।
२१. भोः ! सानुकूलो मे विधिः ।
२२. तिलान् लुञ्चित्वा तिलचूर्णेन भोजयिष्यामि ।
२३. मातः ! अग्राह्याः खलु इमे तिलाः ।
२४. धिग् दारिद्र्यम् खलु देहिनाम् ।
२५. आयुःशेषतया निर्गतोऽहम् । न मृतश्च ।

५. **द्वयोः लघुटिप्पणीं लिखत –** **2½X2=05**

| | | | | |
|---|---|---|---|---|
| १. कथासाहित्यम् | २. बृहत्कथा | ३. कथासरित्सागरः | ४. वेतालपञ्चविंशतिः | ५. पञ्चतन्त्रम् |
| ६. हितोपदेशः | ७.विष्णुशर्मा | ८. नारायणपण्डितः | ९. लघुपतनकः | १०. चित्रग्रीवः |
| ११. हिरण्यकः | १२.मन्थरकः | १३. ब्राह्मणी | १४.ताम्रचूडः | १५. शबरशूकरकथा |
| १६. तिलविक्रयकथा | | | | |

******

सूचना - अवशिष्टानां पञ्चदशाङ्कानां कृते समासाः, कृदन्ताः, अपठितगद्यभागाः अपि भवन्ति ।